नृपाध्वरः, पुं, (नृपाणामध्वरो यज्ञः ।) राजसूययज्ञः । इति त्रिकाण्डशेषः ॥

नृपान्नं, क्ली, (नृपप्रियं अन्नम् ।) राजान्ननाम-धान्यम् । इति राजनिर्घण्टः ॥ राज्ञ ओदनञ्च ॥

नृपाभीरं, क्ली, (अभीरयति ज्ञापयति भोजन-कालमिति । अभि + ईर् + कः । नृपस्य अभीरं भोजनकालज्ञापकवाद्यविशेषः ।) भक्ततूर्य्यम् । राजभोजनकालीनवाद्यविशेषः । इति त्रिकाण्ड-शेषः ॥

नृपामयः, पुं, (आमयानां नृपः । राजदन्तादि-वत् पूर्व्वनिपातः ।) राजयक्ष्मा । क्षयरोगः । इति राजनिर्घण्टः ॥ (नृपस्य आमयो व्याधिः ।) राज्ञो रोगश्च ॥

नृपावर्त्तं, क्ली, (नृप इव आवर्त्तते इति । आ + वृत् + अच् ।) राजावर्त्तरत्नम् । इति राज-निर्घण्टः ॥

नृपासनं, क्ली, (नृपस्य आसनम् ।) राजासनम् । तत्पर्य्यायः । भद्रासनम् २ सिंहासनम् ३ । इत्यमरः । २ । ८ । ३१ ॥ (यथा, भागवते । ३ । १ । २८ ।
"यमभ्यषिञ्चच्छतपञ्चनेत्रो
नृपासनाध्यां परिहृत्य दूरात् ॥")

नृपाह्वयः, पुं, (नृपं आह्वयते गन्धेनेति । आ + ह्वे + अच् ।) राजपलाण्डुः । इति राज-निर्घण्टः ॥ नृपनामा च ॥

नृपोचितः, पुं, (नृपाणामुचितो योग्यः ।) राज-माषः । इति राजनिर्घण्टः । राजयोग्ये, त्रि ॥

नृयज्ञः, पुं, (ना मनुष्यस्तदर्थो यो यज्ञः ।) अतिथिसेवा । यथा, मनुः । ३ । ७० ।
"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"

नृवराहः, पुं, (ना चासौ वराहश्चेति ।) वराह-रूपधृग्भगवदवतारः । यथा,—
"नृवराहस्य वसतिर्महर्लोके प्रतिष्ठिता ।
नृसिंहस्य तथा प्रोक्ता जनलोके महात्मनः ॥"
स एव श्वेतद्वीपे । यथा,—
"शौकरं रूपमास्थाय शार्व्वस्य च दुरात्मनः ।
भविष्यामि न सन्देहो मम शक्त्या त्वरान्वितः ॥"
इति पाद्मे उत्तरखण्डे २८ अध्यायः ॥
अपि च ।
"दैत्यस्ततोऽसौ नृवराहमाहवे
निपातयामास रुषा ज्वलन्तीम् ।
शक्तिं यथा विद्युतमाशु कृष्णे
प्रवर्षमाणोऽपि गिरिं सुमेरुः ॥
स हन्यमानो गदयाप्रमेयः
प्रोवाच दैत्यं नृवराहमूर्त्तिः ।
प्रजापतेः सेतुमिमं निहत्य
प्रयास्य कः स्वस्ति यथासुरेन्द्र ॥"
इत्यग्निपुराणम् ॥

नृशंसः, त्रि, (नॄन् नरान् शंसति हिनस्तीति । शन्स हिंसायाम् + "कर्म्मण्यण् ।" ३।२।१। इत्यण ।) क्रूरः । परद्रोही । इत्यमरः । ३ । १ । ४७ ॥ (यथा, पञ्चतन्त्रे । ३ । १४२ ।
"ये नृशंसा दुरात्मानः प्राणिनां प्राणनाशकाः ।
उद्वेजनीया भूतानां व्याला इव भवन्ति ते ॥")

नृसिंहः, पुं, (ना चासौ सिंहश्चेति । नरसिंह-मूर्त्तिधरत्वादेवास्य तथात्वम् ।) विष्णुः । इति त्रिकाण्डशेषः ॥ विष्णोर्दशावताराणां मध्ये चतुर्थः पूर्णावतारः । तस्य रूपं यथा,—
"सिंहस्य कृत्वा वदनं मुरारिः
सदा करालञ्च सुरक्तनेत्रम् ।
अर्द्धं वपुर्वै मनुजस्य कृत्वा
ययौ सभां दैत्यपतेः पुरस्तात् ॥"
इत्यग्निपुराणम् ॥
महाविष्णुः । तन्मन्त्रादि यथा,—
अथ नृसिंहमन्त्राः । निबन्धे ।
"उग्रं वीरं वदेत् पूर्व्वं महाविष्णुमनन्तरम् ।
ज्वलन्तं पदमाभाष्य सर्व्वतोमुखमीरयेत् ॥
नृसिंहं भीषणं भद्रं मृत्युमृत्युं वदेत्ततः ।
नमाम्यहमिति प्रोक्तो मन्त्रराजसुरद्रुमः ॥
अयं मन्त्रो मायापुटितोऽपि भवति तदा सर्व्व-फलप्रदः । तथा च निबन्धे
"हृल्लेखापुटितश्चेत् स्यात् सर्व्वकामफलप्रदः ।"
अस्य पूजा प्रातःकृत्यादिवैष्णवोक्तपीठमन्त्रान्तं विधाय ऋष्यादिन्यासं कुर्य्यात् । शिरसि ब्रह्मणे ऋषये नमः । मुखेऽनुष्टुप्छन्दसे नमः । हृदि नृसिंहाय देवतायै नमः ॥ ततः कराङ्गन्यासौ ।
"चतुर्भिर्हृदयं वर्णैः शिरस्तावद्भिरक्षरैः ।
शिखाष्टाभिःसमुद्दिष्टा षड्भिः कवचमीरितम् ॥
तावद्भिर्नयनं प्रोक्तं अस्त्रं स्यात् करयाक्षरैः ॥"
ततो मन्त्रन्यासः ।
"शिरोललाटनेत्रेषु मुखबाहुङ्घ्रिसन्धिषु ।
साग्रेषु कुक्षौ हृदये गले पार्श्वद्वये पुनः ॥
अपराङ्गे च ककुदि न्यसेद्वर्णान् यथाक्रमम् ॥"
ध्यानन्तु ।
"माणिक्याद्रिसमप्रभं निजरुचा संत्रस्तरक्षोगणं जानुन्यस्तकराम्बुजं त्रिनयनं रत्नोल्लसद्भूषणम् । बाहुभ्यां धृतशङ्खचक्रमनिशं दंष्ट्रोग्रवक्त्रोल्लसज्-ज्वालाजिह्वमुदारकेशरचयं वन्दे नृसिंहं विभुम् ॥
एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कृत्वा वैष्णवोक्तपीठपूजां कृत्वा पुनर्ध्यात्वावाहनादि-पञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजा-मारभेत । केशरेष्वग्न्यादिकोणेषु मध्ये दिक्षु च अङ्गानि पूजयेत् । यथा उग्रं वीरं हृदयाय नमः । महाविष्णुं शिरसे स्वाहा । ज्वलन्तं सर्व्वतोमुखं शिखायै वषट् । नृसिंहं भीषणं कवचाय हुं । भद्रं मृत्युमृत्युं नेत्रत्रयाय वौषट् । नमाम्यहं अस्त्राय फट् । ततः पूर्व्वादि-दलेषु गरुडं शङ्करं शेषं ब्रह्माणञ्च प्रपूजयेत् । विदिग्दलेषु श्रियं ह्रियं धृतिं पुष्टिञ्च ब्रज-वादिसमीऽन्येन पूजयेत् । तद्बहिः इन्द्रादीन् वज्रादींश्च संपूज्य धूपादिविसर्ज्जनान्तं कर्म्म समापयेत् । अस्य पुरश्चरणं द्वात्रिंशल्लक्ष-जपः । तथा च ।
"वर्णलक्षं जपेन्मन्त्रं तत्सहस्रं हुतमुतैः ।
पायसान्नैः प्रजुहुयाद्विधिवत् पूजितेऽनले ॥"
मन्त्रान्तरं यथा,—
"माया शक्तिर्नरहरिरतुष्टो वर्म्मषट् मनुः ।
षडक्षरो नरहरेः कथितः सर्व्वकामदः ॥"
अस्य पूजा प्रातःकृत्यादिवैष्णवोक्तपीठन्यासान्तं पीठमन्त्रान्तं विधाय ऋष्यादिन्यासं कुर्य्यात् । शिरसि ब्रह्मणे ऋषये नमः । मुखे पङ्क्ति-च्छन्दसे नमः । हृदि नृसिंहाय देवतायै नमः । ततः कराङ्गन्यासौ । आं अङ्गुष्ठाभ्यां नमः । ह्रीं तर्ज्जनीभ्यां स्वाहा । क्ष्रौं मध्यमाभ्यां वषट् । क्रौं अनामिकाभ्यां हूम् । हूं कनिष्ठाभ्यां वौषट् । फट् करतलपृष्ठाभ्यां फट् । एवं हृद-यादिषु । ततो ध्यानम् ।
"कोपादालोलजिह्वं विवृतनिजमुखं सोमसूर्य्या-ग्निनेत्रं
पादादानाभिरक्तप्रभमुपरिसितं भिन्नदैत्येन्द्र-गात्रम् ।
शङ्खं चक्रासिपाशाङ्कुशकुलिशगदादारणान्युद्वहन्तं
भीमं तीक्ष्णोग्रदंष्ट्रं मणिमयविविधाकल्पमीडे नृसिंहम् ॥"
एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कृत्वा वैष्णवोक्तपीठपूजां कृत्वा पुनर्ध्यात्वावाहनादि-पञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजा-मारभेत । केशरेष्वग्न्यादिकोणेषु मध्ये दिक्षु च आं हृदयाय नमः । इत्यादिना षडङ्गानि पूज-येत् । ततः पत्रेषु पूर्व्वादिषु शङ्खं चक्रं चापं अङ्कुशं ध्वजं गदां खड्गं खेटकञ्च प्रणवादि-नमोऽन्तेन पूजयेत् । तथा च निबन्धे ।
"अङ्गावृतेर्व्वहिश्चक्रं शङ्खं चापाङ्कुशौ पुनः ।
ध्वजं कौमोदकीं खड्गखेटौ पत्रेषु पूजयेत् ॥"
तत इन्द्रादीन् वज्रादींश्च सम्पूज्य धूपादिविस-र्ज्जनान्तं कर्म्म समापयेत् ॥ अस्य पुरश्चरणं षड्लक्षजपः । तथा च ।
"ऋतुलक्षं जपेन्मन्त्रं हुतेन जुहुयात्ततः ।
तत्सहस्रं समिद्भिर्वा तोषयेत्तेन वा गुरुम् ॥"
मन्त्रान्तरं यथा,—
"चकारो वह्निमारूढो मनुबिन्दुसमन्वितः ।
एकाक्षरो मनुः प्रोक्तः सर्व्वकामफलप्रदः ॥"
अस्य पूजा प्रातःकृत्यादिवैष्णवोक्तध्यानार्च्चना-दिकं सर्व्वं मन्त्रराजवत् । विशेषस्तु अत्रिरृषि-र्गायत्री छन्दो नृसिंहो देवता चकारो वीजं ईकारः शक्तिः षड्दीर्घभाजा वीजेनाङ्ग-कल्पना । अस्य पुरश्चरणमष्टलक्षजपः । तथा च । अष्टलक्षं जपेन्मन्त्रमित्यादि ॥ * ॥
मन्त्रान्तरं यथा । कल्पे ।
"जयद्वयं समुच्चार्य्य श्रीपूर्व्वो नृसिंहेत्यपि ।
अष्टाक्षरो मनुः प्रोक्तो भजतां कामदो मणिः ॥
अस्य ब्रह्मा ऋषिर्गायत्री छन्दो नृसिंहो देवता षड्दीर्घयुक्तवीजेनाङ्गकल्पना । ध्यानार्च्चनं मन्त्रराजवत् । अस्य पुरश्चरणमष्टलक्षजपः ।